**दिनाङ्क :- 02.09.2024**

**प्रातः - 06:55**

**प्रधानमन्त्री- आन्ध्रप्रदेशे/तेलंगाना**

**प्रधानमन्त्री नरेन्द्रमोदी आन्ध्रप्रदेशस्य मुख्यमन्त्रिणा चन्द्रबाबू नायडुना तेलङ्गानाया: च मुख्यमन्त्रिणा ए. रेवंथ रेड्डी इत्येतेन सह अति वृष्टेः जलाप्लावस्य स्थितेः समीक्षा चर्चायाः माध्यमेन कृतवान्। तौ समाह्वानं पारयितुं केन्द्रात् सर्वाणि सम्भाव्यसहायतां आश्वासितवान्।**

**भाजपा-सदस्यता::**

**भारतीय जनता पार्टी इति अद्यारभ्य सदस्यता-अभियानस्य आरम्भं करोति। प्रधानमन्त्रिणः नरेन्द्र मोदिनः सदस्यतायाः नवीकरणस्य प्रमाणपत्रं भाजपा अध्यक्षात् जगत प्रकाश नड्डा इत्यस्मात् संप्राप्य अस्य अभियानस्य आरम्भः भविष्यति। विद्यमानानाम् सर्वेषां सदस्यानां सदस्यतायाः नवीकरणस्य आवश्यकता भविष्यति। भाजपेति दलस्य संविधानानुसारं प्रत्येकं पञ्चषड्वर्षेषु सदस्यता-अभियानानि नवीनतया क्रियन्ते । अद्यारभ्य नवम्बरमासस्य दशम दिनांक पर्यन्तं चरणबद्धरूपेण अभियानं प्रचलिष्यति। अस्य सदस्यता-अभियानस्य प्रथमम् चरणम् सिप्तम्बर-मासस्य पञ्चविंशति-दिनाङ्के समापनम् भविष्यति ।**

**राष्ट्रपति-न्यायपालिका::**

**राष्ट्रपतिः द्रौपदी मुर्मू: प्रोक्तवती यत् प्रकरणानाम् लम्बनं न्यूनीकर्तुं न्यायपालिकायाः समक्षं महत् समाव्हानं अस्ति। गतसायं नवदिल्लयाः भारतमण्डपम् इत्यत्र जनपदन्यायपालिकायाः द्विदिनात्मकं राष्ट्रियसम्मेलनं सम्बोधयन्ती राष्ट्रपतिः अवदत् यत् हितधारकै: एकत्रितं सम्भूय लंबित प्रकरणान् निवारणाय समाधानं अन्वेष्टव्याः। सा द्वात्रिंशत् वर्षेषु अधिकं यावत् लम्बितप्रकरणेषु गभीरेषु विषयेषु चिन्तनस्य आवश्यकतां बोधितवती ।**

**राष्ट्रपतिः श्रीमुर्मुः प्रोक्तवती यत् दुष्कर्मादिषु अक्षम्य अपराधेषु न्यायालयस्य निर्णयाः एकस्य: वंशस्य व्यतीतस्य अनन्तरं आगच्छन्ति। सा अवदत् यत् अस्मात् कारणात् सामान्यजनः न्यायिकप्रक्रियायां संवेदनशीलतायाः अभावं अनुभवति।**

**कार्यक्रमावधौ राष्ट्रपतिः द्रौपदी-मुर्मुः सर्वोच्च-न्यायालयस्य नूतन-ध्वजस्य प्रतीक-चिह्नस्य च अनावरणम् अकरोत्। सममेव सा राष्ट्रिय-जनपद-न्यायपालिक-सम्मेलनस्य समापन-सत्रमपि सम्बोधितवती। अस्य द्वि-दिवसीय-सम्मेलनस्य आयोजनं सर्वोच्च-न्यायालयेन कृतम्। अस्मिन् जनपद-न्यायपालिकायां पञ्चसत्राणि आयोजितानि। तेषु आधारिक-संरचना समग्र-न्यायालय-कक्षः न्यायिक-सुरक्षा प्रकरण- प्रबन्धनं प्रशिक्षणं च सम्मिलितानि आसन्।**

**<u>गाजा पोलियो सूच्यौषधीकरणम्</u>**

**पश्चिम एशियायां गजा पट्टिकायां संयुक्तराष्ट्रसङ्घस्य अभिकरणैः चत्वारिंशत् सहस्राधिक षड्लक्षं यावत् बालकानां पोलियोविरुद्धं सूच्यौषधीकरणाय अभियानं एकं प्रारब्धम्। इजरायलसैनिकानाम् हमास-योधृनां च युद्धे स्थानीयविरामस्य श्रृङ्खलायाम् इदं अभियानम् आधारितम् अस्ति। सूच्यौषधि-अभियानं ह्यः एव मध्यगजा- क्षेत्रेषु समारब्धम्, आगामिषु दिवसेषु अन्येषु क्षेत्रेषु अपि भविष्यति।**

**<u>पोषणसप्ताह:</u>**

**समग्रदेशे ह्यः आरभ्य राष्ट्रिय-पोषण-सप्ताह: समाचर्यते। अयं सप्ताह: प्रतिवर्षं सितम्बर मासस्य प्रथमदिनाङ्कत: सप्तमदिनाकं यावत् परिपाल्यते। अस्य वार्षिककार्यक्रमस्य प्रारम्भ: द्वयशीत्यधिक-नवदश-शततमेवर्षे महिला-बाल-विकास-मन्त्रालयस्य खाद्य-पोषण मण्डलद्वारा विहित:।**

## पेरिस्-पैरालम्पिक

**पेरिस्-पैरालम्पिक-क्रीडायां निषादकुमारः पुरुषाणां-उच्चकूर्दन-टी- सप्त चत्वारिंशत् स्पर्धायां रजतपदकं विजितवान्, पैरा-स्प्रिन्टर् इति प्रीति पालः क्रीडायाः द्वितीयं कांस्यपदकं समर्जितवती।**

**।। इति वार्ताः।।**